Shree Raghunath Sanskrit Research Institute Library,
Jammu

No. ६५१ - घ

Title शाङ्गधिर पद्धतिः

Author शाङ्गधिर

Extent ३०१ Age १८६२

Subject काव्यम् समाप्त

CC-0 Dharmartha Trust J&K. An eGangotri-Vaidika Bharata Initiative

५६ - हृदयेतदीपक

६५१

CC-0 Dharmartha Trust J&K. An eGangotri-Vaidika Bharata Initiative

॥श्रीगणेशाय नमः श्रीभवान्यै नमः यस्मिन्नुद्बुदसंकरा इव बृहद्ब्रह्मांडखंडाः क्वचिन्मांति क्वापि च सीकरा इव विरिंच्याद्याः स्फुरंति भ्रमात् वि
द्युल्लहरीव विश्वजननी यच्छक्तिः क्वचिद्योतते तस्मै नंदामृतनिर्भरं शिवमहापाथोनिधिं तं नमः १ आसीच्छाकंभरीदेशे श्रीमान्
हम्मीरभूमतिः चाहुवाणान्वये जातः ख्यातः शौर्यैरिवार्जुनः २ तस्याभवत्सभ्यजनेषु मुख्यः परोपकारव्यसनैकनि
ष्ठः पुरंदरस्येव गुरुर्गरीयान् द्विजाग्रणी राघवदेवनामा ३ गोपालदामोदरदेवदासास्तेजात्रयस्तत्तनयास्तदी
याः नेत्राच ता राइव चंद्रमौलेरपाकृतध्वांतगुणास्त्रयोपि ४ तेषां मध्यमस्तु दामोदरोभूत्तस्य धात्री
नात्मजान्वीतरागः भागीरथ्यां प्रहुह्न देहं विहाय ज्ञानानंदात्मन्येव निष्ठां जगाम ५ ज्येष्ठः शार्ङ्गधरस्तेषां लघुर्ल
क्ष्मीधरस्ततः कृष्णोनुजस्ततस्तेषां त्रयस्त्रेताग्नितेजसः ६ जयति शार्ङ्गधरस्त्रिपुराय कुशेशय लब्धमधु
व्रतः सरससूक्तिसुधौघकलानिधिः कविकरींद्रकदंबमृगाधिपः ७ यद्यपि गुणौघनिलयः खलशील
ध्वंसने जिष्णुः तदपि विमलहृदयां तरसज्जनलोकस्य दासोस्मि ते सज्जनाः सुकविशाखिकविलपुष्पारण्यात्

CC-0 Dharmartha Trust J&K. An eGangotri-Vaidika Bharata Initiative

यगुंफितवत्तः सगुणौर्म्मैतत् संधारयंतुंकुतुमोज्वलहारलूये कंठे सुभाषित्तमयास्तस्मस्तदोषं ९ नाशार्ङ्गधरमद्धतिःख
लजनस्ययोग्याभवेत्सुभाषितरसोम्मेयः सुकृतिलोकयेयायतः सुधामदितिनेदनादिविपिवंति दृष्टांतरास्तैयेवतमसः शि
रुहदितिखंडितंश्रूयते १० आनंदाय सतांभूयात्सुभाषितमिदंमम हृष्यकाद्दतिसंमिश्रंयरिकेदैम्मनोरमं ११ आद्यैर्म्महि
ह्निनैः पद्यैः किंयमिरयरैरपि गुंनाय हुतिरेषात्तु सज्जनानंददायिनी १२ इतिश्रीदामोदरसूनुशार्ङ्गधरविरचितायां पद्धतौ संक
लितं ग्रंथवर्णनापरिच्छेदः अथानुक्रमणिका क्रियतेनक्रमः स्पष्टः सवोधार्थे सुभाषिते अत्र तु प्रथमंज्ञेयंकवित्वं शंसवर्णनं
ततोप्यनुक्रमोज्ञेयोवमस्तुसाशिषोतथा सुभाषितेच काव्येचशंससामान्यवर्णके १ विशिष्टकविसं[illegible]सं
साचनिंदाचकुकवेः ततः प्रशंसायंदिनस्यापि निंदांस्याच्चकुपंडिते २ प्रशंसामहतांज्ञेया धीराणांचप्रशंसनं प्रशं
सासज्जनस्याथ प्रशंसाचमनस्विनः ४ अथोदारप्रशंसा स्यात्तुसातेजस्वीनस्ततः गुणप्रशंसासंतोषप्रशंसासंगतो
तथा ५ धनप्रशंसा विज्ञेयानिंदादुर्जनतातथा ततः कृपणनिंदास्यन्निंदायाचकजातथा ६ दरिद्रनिंदाविज्ञेया

CC-0 Dharmartha Trust J&K. An eGangotri-Vaidika Bharata Initiative

२ मूर्खनिंदा ततः परा त्वस्मानिंद्यालोभनिंदा दैवाख्यानं ततः परं ७ उद्यमाख्यानमपरं प्रकीर्णाख्यानकं तथा सममस्याख्यानमथ
प्रहेलिकादिप्रशंसनं ८ द्विमात्रस्यादितद्वत्स्त्र्यन्योन्यमतः परं अथ जातिः समाख्याता सदाचारस्ततः परं ९ धर्मेस्थि
तिर्ज्ञेया यास्यविशतिस्तथा अथान्योक्तिर्विशेषं रवेः सूर्यप्रशंसनं १० चंद्रस्यान्योक्तयो ज्ञेया मेघस्यान्योक्तयस्त
थायोन्योक्तयस्ततः ११ अर्कान्योक्तिस्ततोऽप्येषा काकान्योक्तिः ततः स्मृता वकान्योक्तिः स्मृता नद्यन्दघोञान्योक्तयस्त
तः १२ सिंहान्योक्तिर्गजान्योक्तिर्मृगान्योक्तिस्ततः परा कामान्योक्तिरथान्योक्तयोक्तिया हृदि प्रमान्योक्तयस्ततः १३
मधुपासामान्यवृक्षान्यो १४ शिष्टतरुपद्धतिः पद्मिनान्योक्तयः ख्याता भ्रमरस्यान्योक्तयस्तथा १५ समुद्रान्योक्तयस्त
था दृत्वान्योक्तिस्ततः परं शंखस्यान्योक्तयः तद्वत्कण्वान्योक्तिस्ततः परं १६ तडागान्योक्तयस्तद्वत्कमलान्योक्तय
स्ततः कूपस्यान्योक्तयस्तद्वन्मरुस्थलभवोक्तयः १७ ततो दावानलान्योक्तिः संकीर्णान्योक्तयस्ततः यासद्वे राम
न्यपाशंसा विशिष्टन्दपवर्णनं १८ मल्लायनमरीरंगाचरागमनीतिस्ततः परं नीतिर्मिश्रकनीतिश्च प्रशंसाकरि २

CC-0 Dharmartha Trust J&K. An eGangotri-Vaidika Bharata Initiative

र्णनं तथा १९ अश्वप्रशंसादि ख्याता धनुर्वेदस्ततः परं गांधर्वशास्त्रमपरं हस्त्यायुर्वेद एव च २० तथैव शाकुनज्ञाने
षंभ्रूणां लक्षणानि च विषापहरणं तद्वन्मूलविद्या ततः परम् २१ बालग्रहोपशमनं कौतुकानि ततः परं कल्प
स्थानानि केशानां रंजनानि ततः परम् २२ अथ सामान्यशृंगारे युवतीनां प्रशंसनं स्त्रीपुंसजातिकथनं तथा
ःसंयोगवर्णनं २३ स्त्रीसेवाकथनं तद्वत्संकेतादिप्रशंसनं बालानां वर्णनं तद्वद्वयःसंधेश्च वर्णनं २४ तरुणी
वर्णनं तद्वत्समग्रस्त्रीप्रशंसनं विप्रलंभकशृंगारे प्रियदूतिकाप्रेषणं कांते प्रलापश्च वियोगिनः दूत्युक्तिर्ना
यिकसान्त्वनापिकायां तद्वत्कथः २६ उपहासादिकं दूत्या नायिकायास्ततः परं अथ संयोगशृंगारे पर
स्परविलोकनं २८ प्रियातिथ्यादिकं तद्वन्मानिनीमानवर्णनं कलहोत्थादिकथनं मिथुनस्योक्तयस्त
था २९ प्रियस्य शिक्षा नवयोः प्रसादश्च परस्परं सुप्तास्ते च कटुःखं च तमसो वर्णनं तथा ३० संचारश्चा
भिसारीस्ताः शशांकोदयवर्णनं पानगोष्ठी ततः प्रोक्ता वातुप्रभृतिवर्णनं ३१ सखीवाक्यनवबंधूक्रीडायां

CC-0 Dharmartha Trust J&K. An eGangotri-Vaidika Bharata Initiative

३

तदनंतरं स्मरक्रीडिताख्याने विरहवर्णनं यानगोष्ठी ततः प्रोक्ता वादप्रवृत्तिवर्णनं २१ सखीवृत्तिपरित

तोषं तथा २२ निवृत्तिः स्मरतस्याश्च निशि शय्याक्रीडनं तथा नायिकानन्दयश्चैव प्रभातसमयो क्रमः २३ प्र

भातवर्णनं वायोः सूर्यस्योदयवर्णनं रात्रिसंभोगचेष्टायाः प्रातः प्रकटनं ततः २४ अथ मिष्टकर्मं गोरसतो

ऽमीकुल्लवभूस्थितिः असतीचरितं तत्र हूहूसंज्ञादेश्चवर्णनं २५ ग्रीष्मादेर्वर्णने तत्र हूहूर्षादेरपि वर्णनं॥ शारत्स्वभा

वमाख्याने हेमंतादेश्चवर्णनं २६ शिशिरादेस्तथाख्यानं संमिश्राख्यानकं ततः॥ जलकेलिः प्रयोक्ता च दोलाके

लिस्तथैव च॥ २७॥ तथा भ्रमरिकाक्रीडा कंदुकक्रीडनं तथा॥ नेत्रसमीलनक्रीडा ततः संमिश्रको क्रमः॥ २८॥

ततो विरसो लिंस्यात्करुणारसवर्णने। अद्भुतस्य रसस्योक्तिर्हास्यरसोन्नयः २९॥ भयानकश्च वीभत्सस्ततो

रौद्ररसोन्नयः॥ अथा शांतरसे पूर्वं वैराग्यस्य प्रशंसनम्॥ ३०॥ अनित्यतासमाख्यानं विषयादिविडंबनेप एम

स्वात्नापस्य कथनं कालस्य चरितं तथा॥ ३१ ततो विवेककथनमुपदेशस्ततः परम्। कालसंख्या ततः प्रोक्ता ३

CC-0 Dharmartha Trust J&K. An eGangotri-Vaidika Bharata Initiative

शारीरं तदनंतरम् ॥ ४२ ॥ ततश्चतुर्विधे योगे योगत्रयनिरूपणं । ततस्तु हठयोगे स्यात् गोरक्षादिससाधितः ॥ ४३ ॥ द्वितीयो
हठयोगस्तु मार्कंडेयादिसाधितः । मनःस्थैर्यप्रभावश्च महिमाद्याश्च योगिनः ॥ ४४ ॥ योगिचर्यानंतरं प्रोक्तं ज्ञानेनारिष्टजं
तथा विदेहमुक्तिकथनं कालवंचनसंयुतं ॥ ४५ ॥ शुभाषितं वरस्येति कथितो यमनुक्रमः । ग्रंथं त्रिषष्ट्याभ्यधिकं परि
छेदैश्च कीर्तितम् । ४६ ॥ गणितं यस्य संख्याभिः षट्सहस्रशतत्रयम् ॥ इति श्रीदामोदरसूनुश्रीशार्ङ्गधरविरचिता
यां पद्धतावनुक्रमपरिच्छेदः ॥ अथ नमस्कृतिः । चलत्कर्णानिलोद्धूतसिंदूरारुणितांबरः । जयत्यकाले विसृजं
न्संध्यामिव गजाननः ॥ १ ॥ अविरलविगलन्मदजलकपोलपालीनमधुराकुलः । उद्भिन्नवरश्मश्रुश्रेणिरिव गणाधिपो जय
ति ॥ २ ॥ रूढेभहस्तकस्यापि । उच्चैर्ब्रह्माण्डखण्डद्वितयसहचरं कुंभयुग्मं दधानः प्रेंखन्नागारिपक्षप्रतिभटविक
टश्रोत्रतालीभिरामः । देवः शंभोरपत्यं भुजगपतितनुस्पर्द्धिवर्द्धिष्णुहस्तस्त्रैलोक्याश्चर्यमूर्तिः स जयति जगता
मीश्वरः कुंजरास्यः ॥ ३ ॥ अरीभोकारस्य ॥ इति गणेशः । अथ सरस्वती । कारवदरसदृशमखिलं भुवनतलं यत्प्र
सादतः कवयः । पश्यंति सूक्ष्ममतयः सा जयति सरस्वती देवी ॥ ४ ॥ सुबंधोः । इति सरस्वती । अथ शिवः ॥ नमस्तुंग

CC-0 Dharmartha Trust J&K. An eGangotri-Vaidika Bharata Initiative

४ शिरस्कं विचद्द्वामरचारवे त्रैलोक्यनगरारंभमूलस्तंभाय शंभवे ५ बाणाभहस्त्यमौनादस्तमितैयचातुभणितिः
५ स्वस्यैकहस्ता द्रुतं दूरे य्यंजलिवंधनेपूणामनेस्तज्ञाईमूर्द्धः कुतः इत्थं संघटितैनैकविग्रहतयाग्रो गिरिग्रामणी
र्जामांजातहर्षं जयत्यनुनयन्नूनयन्देवस्त्रिलोकीगुरुः ६॥ कस्यापि। वामांगीकृतवामांगिकुंडलीकृतकुंड
इलि। आविरस्तु शरोवस्कमूर्त्तिभूत्यैवरांवरं ॥७॥ सार्वभौमस्य। पिनाकफणिवालेंदुभस्ममंदाकिनीयु
ता। तयापि भवतेमूर्त्तिरपवर्गानुसारिणी ॥८॥ देवस्वामिनः ॥ उदरदह्यमभरणभयाद्दह्यहिजदारः। यदिनैवं त
स्यैकसुतः कथमथापि कुमारः ॥९॥ सार्वभौमस्य। संध्यानतोनरपुरंध्रिनोः सरोषमनुत्सारितगिरितेगिरिजया
पभे उत्सर्पिकंकपाफणींद्रफणार्पणेन पूर्णोजलिर्जयतिबालमृगांकमौलेः ॥१०॥ कस्यापि। उच्चैरुत्तालखेलभुजव
नयवननपवनोद्धूतशैलौघपातस्फारोद्दंच्चत्पयोधिप्रकटितमुकुरस्यहेनोसंगमानि॥ जीयासुस्ताण्डवानिस्फु
टविकटजटाकोटिसंघट्टभूरिभ्रश्यन्नक्षत्रचक्रप्रवसितसुमनोवृष्टियातानिशंभोः ॥११॥ भेरीभांकारस। मं राम
दारमालाकुलितालकायैकपालमालांकितशेखराय। दिव्यांबरायै च दिगंबरायनमः शिवायैचनमःशि।वाय॥ ४

CC-0 Dharmartha Trust J&K. An eGangotri-Vaidika Bharata Initiative

१२॥ कस्यापि। इति शिवः। अथ गौरी। हरकराद्ग्रहातं दृमौलितांक्षी नमाम्प्रमो। कालकूटविषस्य शोजातम् स्खगतामिव॥
१३॥ बाणभट्टस्य॥ इति गौरी॥ अथ कृष्णः। मेघैर्मेदुरमंबरं वनभुवः श्यामास्तमालद्रुमैर्नक्तं भीरुरयं त्वमेव तदिमं राधेगृ
हं प्रापय। इत्थं नंदनिदेशतश्चलितयोः प्रत्यध्वकुंजद्रुमं राधामाधवयोर्जयंति यमुनाकूले रहःकेलयः।१४॥
जयदेवस्य॥ आमंदमादधतमायतलोचनानामानीलमावलितकंधरमात्तवंशं। आयाहमामकुटमाकलि नम
नोघमाकारमाकलयतामममंतरंतः॥१५॥ पुंजीभूतं प्रेम गोपांगनानां मूर्तीभूतं भागधेयं यदूनां एकीभूतं
गुप्तवित्तं श्रुतीनां श्यामीभूतं ब्रह्म मे सन्निधत्तां॥२६॥ एषवचैतन्यस्यापरमिमयदेशमाद्रिमध्ये निगमवनेषु
नितांतखेदखिन्नाः विचिनत भवनेषु वल्लवीनामुपनिषदर्थमुलूखले निबद्धं १७ एनोविल्वमंभगलचरणा
नो कयासि सखि लुचौरिके प्रमुषितं स्फुटं हृश्यते हितीयमिह मामकं वहसि कंदुकं कंचुके। त्यजेति नवगोपिकाकुचयुगंनि
मय्वनलालसस्य लक्ष्यंजरोज्जयति गोकुले केशवः १८॥ दीपकस्य। इत्यातः कमलासने स्तुभवनो ज्ञानं मनाप्तारुते श्रीकं

CC-0 Dharmartha Trust J&K. An eGangotri-Vaidika Bharata Initiative

गी०वृ०
५

दोपमितःसुरानितिनतांस्तासैंणविज्ञापितःप्रेयस्याःकृतदासनंकचहृतंकंठः क्केशः लसल्लसल्लस्मावामितमानसोविजयते
सुमप्रवृद्धोहरिः २० कस्यापि।श्रुतिविपुलेन्दुवयुगलंरहसिकौसमरशम्भुहृर्लेक्ष्माः तदय हृतं निजहृदयं जयति ह
रिर्मृगयमाराइव॥ २१॥ आरसीहकुरस्य।मकरी।विरचनभंग्याराधाकुचकलशपीडनमसनी।श्रुतमयिर
सांलेयनटवरवेषोहरिर्जयति॥ २२॥ हरिहरस्य।रविन्नोसिमुंचशैलंविभ्रमोवयमिति।वदस्तशिथिल
भुजः।गिरिभरभग्नवितनतवाहुयुगोयेषुहसन्हरिर्जयति॥ २३॥ सर्वधोगः।पिरभ्छपांक्रमः स्रगामक
नराधावरगामोर्नुजावल्लिछायामियमर्पितरी यद्यतिकृतौ इतिकौतुकोयेनिभ्भतमभयोरगुञ्जनयप्रसादोजी
यात्स्वमपिगृहसमस्थितवतोः॥२४॥ कस्यापि।वेहानुहरतेजगन्निवहतेभूगोलमुद्विभ्रतेदैत्यंदारयतेवलिंछ
लयतेक्षत्रक्षयंकुर्वतेपौलस्त्यंजयतेहलंकलयतेकारुण्यमातन्वतेम्लेच्छान्मूर्छयतेदशाकृतिकृतेकृष्णायतुभ्यं राम
नमः॥२५॥जयदेवस्य।जीयासुः कुशलाकृतेर्भगवतःपञ्चछटाछोटनोद्युद्यंगः शातचंद्रिनांवरतलेतेविंदवासैर्याः ५

CC-0 Dharmartha Trust J&K. An eGangotri-Vaidika Bharata Initiative

तिपतन्निरोर्ध्वशिखिनस्तेजोजटालं वपुः पानाध्मानवपुःपानाध्मातवशाद्रोचकरुजां चक्रे चिरस्यास्पदं ॥२६॥ विपस्तुकोष्ठा
स्नोच्छलितनडस्लगंभेनिधिरपाम यान्नापाःपाथःसपर्तलवमूस्रो विपरभूत् अमूभास्वानो वैदिनपतिरमूदेहोर्ध्वदेह
नश्चलल्लाय यस्मिन्सजयतिहरिर्मीनवपुषा ॥२७॥ कस्मापेतौ ॥ नपङ्कराले पंकलपतिधरित्री सपमपा
न्नमस्तान्निष्पसुरनगरं मंशाचकितः ॥ नयनेवत्रस्तां डे स्फुटनभपतोयघर्घररवं वराहेगमाहात्म्यादितिजपतिसं
कोचितनुः २८॥ हठमतः ॥ रैसानामधियेनखांकुरकुटीकोणप्रविष्टात्मनिस्फारीभून्नकरालकेसरसटासंघ
ह घोराकृतेः सक्रोधंच सविस्मयं च सपनुर्व्रीडं चसांतः स्मितं क्रीडाकेसरिणो हरेर्विजयतेतत्कालमालोकितं
॥२९॥ इंद्रकवेः ॥ इतिकृष्णः ॥ अथ वामनः ॥ तेनदेहमसमानमुपवीतच्छलाच्छलात्तगंगास्रोतस्त्रपरोणावयंसरे
वनिषेवते ॥ ३० राजशेखरस्य ॥ इतिवामनः ॥ अथपरविः ॥ भृकनेदुच्छविसविनुगणरुचः पुण्डरीकवनवंधोर्ग
मंडलमुदितं वंदे कुंडलमाखंडलाशायाः ३१ नमस्कृतिः ॥ इतिपाण्डुधरविरचितायां पद्धसानमस्कृतिः परिच्छे

CC-0 Dharmartha Trust J&K. An eGangotri-Vaidika Bharata Initiative

६ र:॥ अथाशिष:॥ तत्र पूर्वं गणेश: दंताग्र निर्भिन्न हिमाचलोर्व्वीरंध्रस्थितां हैदमणिप्रभौघे। नागाननः स्कंधमधिश्रयाकपोललोघर्षन्
पिवन्मोहसितः युनातु॥१॥ गौरींदेवराजानां एकदन्तः स्फूर्तिशितः शंभोस्तनः श्रियेस्तवः विघ्नांकं ददुको भिन्ननवांकुरमनोहरः
॥२॥ श्रीधनदेवानां गंडस्थलीगलदमंदप्रवाहमासुहिफ मधुरस्वरदत्तकर्णः हर्षादिगालसनिमीलितनेत्रयस्मो विघ्नच्छिदेभव
वुभ्रन्नय तिर्गणेशः ३॥ आसीन्नगरप्राकारप्रशस्तो॥ विघ्नौघ: मयामाहिहंति घुजलधीमु स्फराग्रेणपीलाय स्विन्नुद
तविश्वं वमजितदखिलं हृश्यते यो स्मिंदेषै: क्वाप्यंभः क्वापि विस्फुः क्वचन कमलभूः क्वाप्यनन्तः क्वचिच्छ्रीः क्वाप्येवं:
क्वाप्येवं: क्वापि शैलाः कंचनमणिगणाः क्वापि नक्रादिसत्वाः॥४॥ हनुमतः॥ सानंदं नंदिहस्ताहतमुरजरवाहूतकौ
मारबर्हिन्नासान्नासाग्ररंध्रं विशति फणिपतौ भोगसंकोचभाजि गंडोड्डीनालिमालामुखरितककुभस्तांडवे शूल राम
पाणेर्वैनायकाश्चिरं वो वदनविधुतयः पांतु चीत्कारवत्यः भवभूतेः॥ इति गणेशः॥ अथ शिवः॥ उपहरणं विभवानां ६
संहरणं सकलदुरितजालस्य उद्धरणं संसारात्चरणं शम्भोः श्रेयसे स्तु विश्वस्य यतेः॥६॥ विद्याधरास्य श्रीवरगानं। आसीने पुष्पि

CC-0 Dharmartha Trust J&K. An eGangotri-Vaidika Bharata Initiative

नूंम्मीय्यसनिनिशशानिमोम्नि हृस्मेदैत्यैर्द्रेयातिनिद्रांद्दवतिमयवनित्स्कांनकांतोकृतांते। अत्रलस्पंद्दवापोकम
लयघटकुटो ग्रा[illegible]यिये शांतसपापेयापाहः कालकूटं रुरितिकवलयलीलायालीलकंठः॥ ७॥ ज्ञपारंवस्यप्रशस्तेः वक्रेशीनकरोधरो
धवसः कामप्रदो विग्रहः श्वसैणधवहः सरोरुहसुहन्माशिः स्मितामाः पुचिः वक्षः पीनपयोधराधिकरणं हृष्टीनि
तंवस्थलीतस्थो धूर्जटिमतेयः स्मरभयाद्दुर्गाश्रिताः पान्तुवः॥ ८॥ देवेभ्यास्या कसंभूलीमटगपसिषजं नीलकंठः प्रि
तंवस्थलीतस्थे धूर्जटिमतेयः स्मरभयादुर्गाश्रिताः पांतु वः॥ येहंके कामिको कुरुल्यमपतिर्नैवहृष्टो विषाणो। स्थाणु
र्गधेनवदतिनत्वंजौ वितिशः शिवायाः गच्छाटव्यामितिहजवचाः पातुवस्सदेवनूडः॥ ९॥ श्रीभारतीकवेः॥ व्यक्तामिंदोर्लेखं
रतिकलहमयूंचवलं पं समं वक्रोहृत्तमप्रहसितमुखी शैलतनया। प्रदोचहंपप्रेपत्पवनुसशिवः साचगिरिजासचक्रोग
चं द्रेरहशनकिरणैः परितनम्। १०॥ श्रीगांगदेवस्य॥ कल्पांते क्रोधनस्य त्रिपुरविजयिनः क्रोडयामंचरिक्षोः कृत्वापि प्रा
णिजातेर्न्निजमरवकुहरातिप्यमग्रामन्तसेः दिग्भिन्नतोः प्रेक्ष्यभस्माः प्रलयजलनिधिवेष्टिता। लोमयमूर्तियासमग्रा

CC-0 Dharmartha Trust J&K. An eGangotri-Vaidika Bharata Initiative

शा०व्र०
८

सक्तिमोघश्रमजनितरुषः पांतु वो गर्ज्जितानि ॥ ११ ॥ भैरीभांकारणैव ता विशेषमुदितोज्जो मत्स्यकूर्मोवुभो कर्षन धीवरतांग
तः स्प नु सत्तां मोऽहं महा भैरवः ॥ १२ छिन्नमस्त ॥ इति शिवः ॥ अथ लोचने ॥ पक्ष्माली पिङ्गलिम्नः कराङ्गव नङ्गिनां पस्पृक्
त्त्वः सम्भ्रेय स्मिन्नव्रह्नोऽर्मीषद्विघटितमकुलेकालयहाजहाव । अर्चिर्न्निष्ठ्यूत तूङ्गपाशि गलितमुधा घोरझं
कारि कोपां तातीयं यमुरारेस्मद्रवतमदनप्लोषणं लोचनं वः ॥ १३ ॥ श्रीभवभूतेः ॥ अथ गणाः । संध्या नाट्ये वरव्युस
निमोरेव सप्त्वा शशिपते र्भ्रीशायां कुकपालदाम घट्टनाम्य यागरणाः पांतु वः स्मैरोन्मुक्तव शी क्रैमेग्रे हग राज्दृहो ।
गृहीतेजवास्त्र्यां चंद्रमसोर्मिथः स्मितवतौ ज्ञोतकरास्फालनं ॥ १४ ॥ कस्यापि ॥ इति गणाः ॥ अथ जटाजूटः ॥ स
धूर्जटिजटाजूटो जायतां विजयाय वः । यत्रैकपलितभ्रान्तिं करोत्यद्यापि जाह्नवी ॥ १५ ॥ सूरवर्म्मणः ॥ इति जटाजू
टः ॥ अथ पार्वती ॥ प्रत्यासन्नविवाहमंगलविधौ देवार्चनव्यग्रया दृष्ट्वाग्रे परिणेतुरेव लिखितां गंगाधरस्याकृतिं राम ८
। उन्मादस्मितरोषलज्जितधियागोत्रा कथं चिद्विरा हुंहुं स्त्रीवचनात्प्रियेविनिहितः पुष्पांजलिः पातु वः ॥ १६ ॥ वस्सः

CC-0 Dharmartha Trust J&K. An eGangotri-Vaidika Bharata Initiative

पीठे निरीश्य स्फटिकमपि शिलामंडल स्वच्छभासि स्वांच्छायां साभ्यमस्यात् समियमिति मुहुः सभ्यगाशंक्य मितापि । वामैमे
दृश्यतोस्याः श्रवसि कुरलयं नाहमित्यालयंती दत्ताश्लेषा सहासं मदनविजयिना पार्वती वः पुनातु ॥ १७ ॥ कस्या
पि । स्वेरस्ते कथमो दृशः प्रियतमे त्वन्नेत्र वह्ने विभो कस्माद्दूषित मेतदीदृं वदने भोगी द्रुमीतेर्भवरोमाज्ज्वः कथमे
वेदेवि भगवन् गांभसी सीकरैरित्युं भसां सीकरैस्त्यं भर्त्तेरिभावगोपनपरा गौरी चिरं पातु वः १८ कस्यापि । इतिपार्व
ती । अथ षण्मुखः । अच्छिप्यंति विदार्यवक्रकुहराण्याशाक्तितो वासुकेरंगुल्या विषमन्नेराग्रण्यपतः संस्पृश्य दंतांकुरा
न् एकं त्रीणि च सप्त पंच षडिति प्रध्वस्तसंख्याक्रमाः वाचः क्रौंचरिपोः शिशुत्वविकलाः श्रेयांसि पुष्णंतु वः १९
कस्यापि । इति षण्मुखः । अथ गंगा । मुक्ताभान्नकपालभुक्तिषु जटावल्लीषु मल्लीनिभा वन्हौ लाजनिभा दृशोम
णिनिभा भोगोत्करे भोगिनां । इत्थं या वर्तते विवर्त्तने रिपयः संमूर्छनोच्छालिताः खेलंतो हरमूर्द्धि पांतु भवतो गंगापयो
विंदवः २० ॥ कस्यापि । एषां धर्म्मेयता किंनीनट सुधासेवाव सन्न्या किंनो भृश्यत्स्तात् किंनो भगीरथतनयः साप

CC-0 Dharmartha Trust J&K. An eGangotri-Vaidika Bharata Initiative

फल्गहेवाहिनी प्रेमानूढपिनाकिनी गिरिसुतासाकेकरालोकिनीयायाडंवरङाकिनी त्रिभुवनानंदायमंदाकिनी २१ कस्यापि
इतिगंगा॥अथतांडवं देवादिकाः॥ यः याचातयरजः खे मुंचन्तां भोमुचः याता लेखजमेदिनिप्रविशत्सोपीतलंमू
धराः व्रस्यन्त्यनूरमात्मभवनं नाथस्यनोन्वयतः शंभोः संकरमेतदित्यवतु वः प्रोत्सारणानंदिनः २२
महानाटकान्ताः संध्यातांडवडंवरव्यसनिनो भर्गस्य चण्डभ्रमिव्यानम्रभुजदंडमंडलभुवो झंझानिलाः
पांतु वः येषामुच्छलतां जवेन झगिति व्यूहेषु भूमीभृतामुड्डीनेषु बिडौजसा पुनरसौ दंभोलिरालोकितः॥ २३॥
सौमनाथप्रशस्तेः इति तांडवं॥ अथ हरिहरौ॥ स्फटिकमरकतश्रीहारिणोः प्रीतियोगात्तदवनुवपुरेकं कामकंस
द्विषोर्वः भवति गिरिसुतायाः हुंमंभोधिपुत्र्यासहशमहमिकं देयत्र सीमाविवादः॥२४॥ कस्यापि॥ यो नेतेशं खदक
पालभूषितकरौ मालास्थिमालाधरौ देवौ द्वारवती श्मशाननिलयौ नागारिगोवाहनौ। द्वित्र्यक्षौ बलिदक्षयज्ञमथ
नौ श्रीशैलजावल्लभौ पापं वो हरतां सदा हरिहरौ श्रीवत्सगंगाधरौ॥ २५॥ इति हरिहरौ। अथ चक्रं। विद्रावो

CC-0 Dharmartha Trust J&K. An eGangotri-Vaidika Bharata Initiative

रुद्दन्नेदसवितरि तरलेवज्रिणि ध्वस्तवज्रेजाताशंशाकेविरमतिमरुतित्यक्तवैरेकुबेरे।वैकुंठेकुंठितास्त्रेमहिषम
तिरुषंपौरुषोपघ्ननिघ्नंनिर्विघ्नंनिघ्नतीवःशमयतुदुरितंभूरिभावाभवानी॥ २६॥ बालाभद्रस्य।इत्तिस्वरागिय
पाकूलमः।यांनुवोजेलरद्रुपामाःशार्ङ्गज्याघातकर्कशाःत्रैलोक्यमंडपस्तंभाश्चत्वारोहरिबाहवः॥ २७॥ कस्यापि
।भ्राम्यन्नंबरकंदरोदरदरीव्यावर्त्तिभिर्वीचिभिःकल्लोलैरलमाकुलंकलयतोलक्ष्म्यामुखांभोरुहं।क्षीरोत्तु
ल्याततरल्लाःस्मरा ह्हिकसिताभीतासमाकुंचिताःक्रोधेनज्वलितामुदामुकुलिताःशौरेर्दृशःपांतुवः॥२८॥कस्या
पि।अर्द्धोन्मीलितलोचनस्यपिबतःपर्याप्तमेकंस्तनंसद्यःप्रस्नुतदुग्धदिग्धमपरंहस्तेनसंमार्ज्जतः।मात्राचांगु
लिलालितस्यचिबुकस्मेरायमानेमुखेविष्णोःक्षीरकणांबुधामधवलादंतद्युतिःपातुवः॥२९॥बिल्वमंगलचरणा
नां॥अस्मिन्कुंजेविनापिप्रबलितपवनाद्दूतेनेकोरयेनूनंपप्राभःकिन्नागलेस्यनुसरतिगरोभीतभीतेभका
गां।तस्मिन्राधासखीवःसरव्यनुविलसल्लीलयाकेटभारिर्यातित्वान्योन्यगारिप्रचलंघुरघुरारावरौद्रान्विता

CC-0 Dharmartha Trust J&K. An eGangotri-Vaidika Bharata Initiative

९ दान्॥३०॥कस्यापि।दृष्ट्वैरा।र्पित्त मालोक्य मा या स्त्रीनूपमात्मनः।आत्मन्येवानुरक्तो वः शिवं दिशतु ॥३१॥कस्यापि।
१ गच्छाम्यच्युत दर्शनेन भवतः किं तृप्तिरुत्पद्यते किं त्वेवं विजनस्थयोर्हतजनः संभावयत्यन्यथा इत्यामंत्रणभंगिसूचित
हृष्यानरे वदालसा माश्लिष्यन्पुलकोत्करां चिततनुर्वः ॥३२॥कस्यापि। तूर्ण यं कौस्तुभोद्भासिहरेः युष्मानवतु श्रियं
।मांगधायवेशयो धायवेशयोधायरतमद्दमिव श्रिया ॥३३॥कुं[illegible]ः।नीजकथामाकर्णपूर्णमात्रे रितां से
मिचेक धनुर्धन्विरि प्रोक्ताः गिरः पांतु वः ३४॥वसुधरस्य। सकलभुवनैकवैरमंदोः सरोजैरनुचितमितिमत्वाय
स्वयाहारविंदं। वटपत्रमिवमायी योजयन्नाननेदौ वटदलपुटशायी मंगलं वः हरिः स्यात् ॥३५ कस्यापि।कोयं
द्वारि हरिः प्रयाह्युपवनं शाखामृगस्यात्र किं कृष्णोहं दयिते बिभेमि सुतरां कृष्णः कुतो वानराः।राधेहं मधुसू
दनो व्रजलतां तामेव पुष्पान्वितां मित्थं निर्वचनीकृतो दयितया ह्रीणो हरिः पातु वः ॥३६॥कस्यापि। अयं यादृशा राम
वतारः।दिशपाद् कुशलाकृतिः सभगवान्मे श्रेयसी संपदं यस्य स्फूर्जद्दन्तच्छदच्छविशिखरस्थैर्लोलनक्रीडनैः।विवधर्माद्धि ९

CC-0 Dharmartha Trust J&K. An eGangotri-Vaidika Bharata Initiative

समुच्छलज्जलभरैर्मन्दाकिनीसङ्गिगासागरसंगमप्रणयिनीजाताविहायस्थली ३६ निःश्वासहमनलस्वलितैर्लोकाक्षरक्षागुरुर्द्धी
शकूर्म्मकलेवरः सभगवान् दिश्यात् संहाममुदं कस्मान्नोदधिमध्यमज्जनवशाद्यासर्य्यतः संलुटत्स्वेदस्रवसैकतकणच्छायं भ
रित्रीतलं॥ ३७। दृष्य्यद्देत्यकुटुम्बिनीजनमनः सन्तोषसङ्कोचनः कुर्याद्दिव्यमनश्वरं सभगवान्कोलावतारो हरिः॥ य
द्दंष्ट्रांकुरकोटिकोटरकुटीकोणान्तरस्येयसी सप्तद्वीपा भान्यवदातकेतककरल्लालीनेव भृङ्गाङ्गना। ३८। हन्तमत्त एन्ते।
घटच्छटत्तिवर्म्मपिच्छमिति चोच्छलच्छोणितेधगद्धगिति मेदसिस्फुटरवास्थिनि छ्रागिति त्रिभुवनाम भवनो हरेरमरवैरि
वक्षस्थलच्छणच्छकरजप्रजरक्रकचघर्षजन्मानलः। ४०॥ व्याक्रान्तिराजस्य ब्रह्माण्डच्छत्रदण्डः शतधृतिभवनाम्भोरुहो
नालदण्डः क्षोणीनौकूपदण्डः क्षरदमरसरित्पट्टिकाकेतुदण्डः। ज्योतिश्चक्राक्षदण्डस्त्रिभुवनविजयस्तम्भदण्डोऽङ्घ्रिदण्डः श्रेयस्त्रैवि
१० क्रमस्तेवितरतुविबुधद्वेषिणां कालदण्डः ४१ दण्डिनः किंदोर्भ्यां किमकार्मुकाय निषङ्गाभ्याङ्गेपसारेन किं किंवेदा
श्री०दु० धिगम्येन भास्वति मृगोवंशेन च किं जन्मना। किं चानेन भमाभ्रुतेत्तपसा पीडांकृतां तोयिचेद्दिप्रारंगां कुरुतेन्तारि

CC-0 Dharmartha Trust J&K. An eGangotri-Vaidika Bharata Initiative

या०ब्रा० स्तनुशयो रामस्य युष्मानुवः ४२ हनूमतः कूर्मो मत्लववदालवद्यंगराशि ह्लेनावह्द्दिशो मेघाः १ स्ववदनस्तनस्य स वन्नक्षत्र सर्पैर्दवुः
१० स्वामिन्योमनरुक्रमो ममक्रियान् स्कत्वे निगंमाहृते सोनान्वेषणमादिशत् दिशतु वो रामः सुलजः श्रियं ॥४३॥ कंसाराविहस्म
10 त्वंन व यो वनेमि च पलाः प्रायेयागोयांगनाः कंसो भूपतिरज्ञ नाल मतुल यीवाव यंगोदुहः न घावें जलिनाभ वं नमे धु
नाहंह्वा वनं मह्विनामा यासारिति नेदृगोपव वुसान्नमो हरिः पातु वः ४४ । विल्लंगंगत्त्व श्रीचरणानो ध्यान व्याज
सुयेत्स चिज्ज यसि कामुन्मील्य चक्षुः स्वपांय श्यानेगश रानु [redacted] रंजन मिमं ज्ञातापितेरक्षसि । मिथ्याका
रुणिकोसिं निर्दय तस्त्वतः कुतोन्यः पुमान् शश्वन्मानव धूमिरित्यभिहितो वुद्धो जिनः पातु वः ॥४५॥ श्रीहरिगपास्य ।
उद्यत्करवालः शंकातिमिरध्वंसने महानिपुणाः कल्किहरिर्विः पापादपापनः कलिनिशांतो नः ॥४६॥ शार्ङ्गधरस्य ।
पीटीनः । कमठः किटिन्हिरं हरिः खर्वीहृत भार्गवो रामः कंसनिषूदनो दशबलः कल्कीच नारायणः युष्माकं स विभूतयेस्तु राम १०
भगवानसेतुर्भवांभोनिधा वुत्तारामयुगे युगे स गयति स्वैलोकान्नाथो हरिः॥ ४७॥ हनूमत इति दशावताराः । अथ

CC-0 Dharmartha Trust J&K. An eGangotri-Vaidika Bharata Initiative

लक्ष्मी पायात्पयोधिदुहितुः कपोलामलत्वं द माः यत्रसंक्रान्तविंबेन हरिणाऽपितं ४८ कस्यापि उत्तिष्ठतः सारतांतो भर
भरणायतेनापि नैकेन कन्चाध्वलाचान्ते नवाम्रो विलुलितकवरीभारमंसेव हेमाः । भ्रमस्तत्कालकान्ति द्विगुणितस्तनश्री
नाशौरीणां वः शय्यामालिंग्य नीतेव भुरलसलसहूहूलक्ष्म्याः पुनातु ॥ ४९ ॥ विश्वानारायणस्याङ्किलक्ष्मीःत्र
पस्तस्यैः सिंदूरस्पृह मास्पशन्ति करिणां कुंभस्य माधोरणाभिल्लीपल्लवशंकयाविचिनुते सांद्रे दुमद्रोणिषु । का
न्ताः कुंकुमशंकया करतले मद्देञ्जिलग्नं च यत्तत्तेजः प्रथमोद्भवं भ्रमकरं श्रियं पातु वः ॥ ५० ॥ त्रिविक्रमस्याजं
भारानीमकुंभोद्भव मिव दधतः सांद्रसिंदूररेणुं रक्ताः सिक्ताइवौघैरुदयगिरितटीधाउधारा द्रवस्य । आयांत्या
तुल्यकालं कमलवनरुचेवारुणावो विभूत्यै भूयासुर्भासयंतो भुवनमभिनवा भानवो भानवीयाः ॥ ५१ ॥ भक्ति
प्रह्वायदातुं मुकुलपुटकुटीकोटरक्रोडलीनां लक्ष्मीमाक्रष्टुकामाइव कमलवनोद्घाटनं कुर्वते ये । कालाकारां
धकारानननयति तज्जगत्साध्वसध्वंसकल्याः कल्याणं वः क्रियासुः किशलयरुचिरस्ते करा भास्करस्य ॥ ५२

CC-0 Dharmartha Trust J&K. An eGangotri-Vaidika Bharata Initiative

१२ स्तोमभूरमहस्य ॥ इति श्रीशार्ङ्गधरविरचितायां पद्धत्यां आशीर्वादपरिच्छेदः ॥ अथ सुभाषितप्रशंसा ॥ संसारे
नरदेवभूषणमयं कारकं समवसेरेषन्नं सुरक्षं सन्के दधति सुवर्णोकस्या णामनधीमिह धन्याः ॥१॥ कस्यापि ॥ कथमि
ह मनुष्यजन्मा संप्रविशति संसदि विबुधगमितायां येन न सुभाषितामृतमास्वादितमनंतमाल्ट्येः ॥२॥ चाणा
क्यस्य ॥ सुभाषितमयैर्द्रव्यैः संग्रहं न करोति यः । सोपि यस्ताव यज्ञेषु कां प्रदास्यति दक्षिणां ॥३॥ चाणाक्यस्य ॥ प्रसन्नाः
कांतिहारिण्यो नानाश्लेषविचक्षणाः भवंति कस्यचित्पुण्यैर्मुखे वाचो गृहे स्त्रियः ॥४॥ त्रिविक्रमभट्टस्य ॥ ये
स्यंकी दुकलाकलंकजनकौ येगोटगर्वज्वराये वा केवलतर्ककर्कशधियः साक्षाच्च ये श्रोत्रियाः । ये वा वेष
मषीमलीमसधियं स्तान्प्राज्ञगोष्ठीरसप्रौढप्रौढवयहागमारेहु रन्नवाचां प्रसारं कुरु ॥५॥ कस्यापि कर्णामृतं सूक्ति
रसं विमुच्य दोषेषु यत्नः सुमहान्खलस्य । अवेक्षते केलिवनं प्रविष्टः क्रमेलकः कंटकजालमेव ॥६॥ बिल्हणस्य राम
॥ इति श्रीशार्ङ्गधरविरचितायां पद्धत्यां सुभाषितपरिच्छेदः ॥ अथ काव्यप्रशंसा ॥ अविदितगुणापि सुकविभणितिः १२

कर्णेषु वमति मधुधारां । अनधीगतपरिमलापि हि हरति दृशं मालतीमाला ॥ १॥ सर्वंधोः । निरवद्यानि पद्या
नि यादि चार्यस्य काप्यृत्तिः भिक्षुकक्षाविनिक्षिप्तः किमिक्षुर्नीरसो भवेत् ॥ २॥ भवभूतेः कान्तस्य छायमेः सुराः स्वर्गे नि
वसामो वयं भुवि । किंवा काव्यरसः स्वादुः किंवा स्वादीयसी सुधा ॥ ३॥ कस्यापि ख्यातिं गमयति सुजनः सुकविर्विदधा ।
ति केवलं काव्यं । पुष्णाति कमलमंभो लक्ष्म्या तु रविर्नियोजयति ॥ ४॥ कस्यापि या विपुलहृद्यद्याभियोग्येस्वि घृतिका
मेजज्ञे न मैरवैस्ते । निर्दतिकंचुकमेव प्रायः प्रकटस्तनी नारी ॥ [illegible] यातायां निचयान्तरो लोकः शोकाधिकाभ
वः काव्यसंबंधिनो कीर्तिः स्थापिनी निरपायिनी ॥ ६॥ भवंतदेवानां ॥ किं तेन किल काव्येन मृग्यमानस्य यस्य गाः
उदधेरिव नायान्ति रसान्तरपरं परा ॥ ७॥ जयामाधवस्य ॥ नवोक्तिर्जातिरग्राम्या श्लेषोष्टः स्फुटो रसः । विकटाक्षरसं
बंधः कृत्स्नमेकत्र दुष्करं ॥ ८॥ नारायणभट्टस्य ॥ दुर्जनहुताशतप्तं काव्यसुवर्णं विशुद्धिमयाति । दर्शयितव्यं तस्मान्म
त्सरिमनसः प्रयत्नेन ॥ ९॥ कस्यापि ॥ यं ग्राहकसमुद्वर्गाम्भूत्वा मिव पतति सुमेरो रम्यवाहुर्मीलत्कुकुविदेतलइव स्वच्छः पद्यार्थसक्त

CC-0 Dharmartha Trust J&K. An eGangotri-Vaidika Bharata Initiative

पः तत्राप्युल्लसदंशुकांतविलसत्कांताकुचांतोद्यमं गंधस्पृहो कवित्वमपरं वाग्देवतोपासनं ॥१०॥ कस्यापि ॥ सम्भ्रमि
मीहिमे काव्ये च याङ्गुज्जेन गर्ज्जनं महादेवक्षेत्रे चेद्वे रुद्रः किं विघ्नं नरः ॥११॥ वित्तपच्च जुर्ह्वेरस्य इति श्रीशार्ङ्गधर
विरचितायां पद्धत्यां काव्यप्रशंसापरिच्छेदः ॥ अथ सामान्यकविप्रशंसा ॥ कतियपतिमेपवर्तिनिजन्मजरामरणा ॥ विद्व
त्वेच्चगति ॥ कल्पांतकोटिं विधुः स्फुरंति कवीनां यशःप्रसरः ॥१॥ प्रबंधरस्य ऽस्यभाषितरसास्वादद्वहुरोमांचकंचुकः
विनापि कामिनी संगात् भिज्ञः सुखमेधते ॥२॥ कस्यापि ॥ संतिश्वानइवासंख्याजातिभाजो गृहे गृहे उत्पादकानवहवः
वयः शरभाइव ॥३॥ वाणामहस्याः ॥ कवयः परितुष्यंति चित्ते नेरे कविसूक्तिभिः न त्वकूपाकरवल्लूयावर्द्धते विधुकांतिः
भिः ॥४॥ श्रीधवदेवानां किं कवेस्तस्य काव्येन किं कांडेन धनुष्मतः ॥ परस्य हृदये लग्नं न घूर्णयति यच्छिरः ॥५॥ त्रिवि
क्रमभट्टस्य ॥ सुखमाड्डेरा काव्यस्य करोत्यहृदयो जनः ॥ यामच्छामयि शपामोग्रहस्ता रायन्ते रिवे ॥६॥ वाणोमहस्यः ॥
लंकायते ॥ संकुचितं यशो यद्यत्कीर्तिपात्रं रघुराजपुत्रः ऽसमस्तएवादिकवेः प्रभावो न कोपनीयाः कवयः क्षि

CC-0 Dharmartha Trust J&K. An eGangotri-Vaidika Bharata Initiative

तोद्भैः ७॥ बिल्हणस्य। उत्फुल्लगल्लैरालापाः क्रियंते दुर्मुखैः सुखं। जानाति हि पुनः सम्यक्कविरेव कवेः श्रमं ८॥ त्रिविक्रमभ
ट्टस्य। शीलं विज्ञाभारुत्तामोरिकाद्याः काव्यं कर्तुं संति विज्ञाः स्त्रियोपि। विद्यां वेत्तुं वादिनो निर्विजेतुं विश्वं वक्तुं यः प्रवीणाः स वंद्यः ९
॥श्रीधवदेवानां॥ अपि मुदमुपयातो वाग्विलासः स्वकीयैः परभणितिषु तृप्तिं यांति संतः कियंतः। अपि घनमकरंदस्यन्द
पूर्णालवालवालः कनककलशसेकैर्न हृष्टेः किं रसालः॥१०॥ श्रीजयदेवस्य। ते धन्यास्ते महात्मानो येषां लोके स्थितं य
शः। यैर्निबद्धानि काव्यानि ये च काव्येषु कीर्तिताः॥११॥ कस्यापि। जयंति ते सुकृतिनो रससिद्धाः कवीश्वराः। ना
स्ति येषां यशःकाये जरामरणजं भयं॥१२॥ भर्तृहरेः। माघेन विघ्नितोत्साहा नोत्सहंते पदक्रमे। स्मरंतो भारवेरेव
कवयः कपयो यथा॥१४॥ धनपालस्य। तावत्कविविहंगानां ध्वनिर्लोकेषु शस्यते। यावत्तो विशति श्रोत्रे मयूरम
धुरध्वनिः॥१५॥ हृदि लग्नेन बाणेन यन्मंदोपि पदक्रमः। भवेत्कविकुरंगाणां चापलं तत्र कारणं॥१६॥ त्रिलोचनस्यैतौ। भा
सोनामिरसोमिलो वररुचिः श्रीसाहसांकः कविर्मीघो भारविकालिदासतरलाः स्कंधः सुबंधुश्च यः। दंडीबाणदिवाकराः

CC-0 Dharmartha Trust J&K. An eGangotri-Vaidika Bharata Initiative

१३ 13 तेःसंतिनयस्ययाशंसिकवीश्वरास्तत्कुतोयशांसि। भूपाः कियंतोनबभूवुरुर्व्यांनामापिजानातिनकोपितेषां ॥१३॥ विल्हा
णः। अर्थान्केचिदुपासतेकृपणवत्केचित्त्वलंकुर्वतेवेश्यावत्खलुधातुवादिनइवोद्बध्नंतिकेचिद्रसान्। अर्थालंकृ
तिसद्रसद्रवमुचांवाचांप्रशस्तिस्पृशांकर्तारःकवयोभवंतिकतिचित्पुण्यैरगण्यैरिह ॥१४॥ राघवचैतन्यश्रीचरणानां
कविताकाम्यतनोर्यत्नैः ॥ पूतानस्यशमशोदेहाः येषांनएवभूमाजीवंतिमन्नाद्येवान्ये ॥१५॥ अम्हतोमेक्षणेचा
रुशेषजनःकविर्गरुडन्मागर्द्दइववज्रादिहतकृत ॥१६॥ एतौशार्ङ्गधरस्य। काव्यमप्यौगीरयोयावच्चरंतिवि
शदाभुवि। तावत्सशाश्वतंसानंकविराससाद्यतिसंततिः ॥१७॥ कस्यापि ॥ इतिश्रीशार्ङ्गधरविरचितायांपद्धत्यांसामान्यक
विप्रशंसापरिच्छेदः ॥ अथविशिष्टकविप्रशंसा कवीन्दुंनौमिवाल्मीकिंयस्यरामायणींकथां ॥ चंद्रिकामिवचि
न्वंतिचकोराइवसाधवः ॥१॥ शार्ङ्गधरस्य ॥ श्रवणांजलिपुटपेयंविरचितवान्भारताख्यममृतंयः। तमहमरागमतृ राम
ष्णंकृष्णद्वैपायनंवंदे ॥२॥ नारायणभट्टस्य ॥ त्रयोयंयस्यलोकोवेदास्त्रयोदेवास्त्रयोहेतवास्त्रयोगुणाः त्रयोदंडिप्रवंधा १३

CC-0 Dharmartha Trust J&K. An eGangotri-Vaidika Bharata Initiative

अविरविस्कृता ३ राजशेखरस्य। कवयः कालिदासाद्याः कवयो वयमप्यमी पर्वते परमाणौ च पदार्थत्वं प्रतिष्ठितं ॥४॥
हस्समभट्टस्य। कविरमरः कविरचलः कविरभिनंदश्च कालिदासश्च। अन्ये कवयः कपयः चापलमात्रं परं दधति ५
कस्यापि श्लेषे केचन शब्दगुंफविषये केचिद्रसे चापरे लंकारे कतिचित्सदर्थविषये चान्ये कथावर्णाक्राः आसर्वत्र
गभीरधीनककविताविकुंभिदुरावाणाक्तपंचाननः ॥६॥ श्रीवत्सदेवतानां भवभूतिमनाहत्य निर्विस्मसमतिनामयाःमु
रारेः पदचिंतायामिदमाधीयते मनः ॥७॥ कस्यापि। नीलोत्पलदलश्यामां विज्जकां मामजानता। वृथैव दंडिना प्रो
क्तं सर्वशुक्ला सरस्वती ॥८॥ विज्जकायाः इंदुप्रभारसमिदं विहगं विहाय कीरानने स्फुरति कारतिस्ते। आघ्रं यदिस्रय
सिजल्पतु कौमुदीनां गोविंदराजवचसां च विशेषमेषः ॥१०॥ देवेश्वरस्य यदेयं वाग्देवी भुकरसितवासाव्यसनिनी कुहूकं
ठे कंठे विलसति तथा वैदर्भन वाधि॥ तदा भूमी मा गोनिर्गुणमतमः किंचिद्दिवसा समाधत्ते साम्पं धनदभणितीनां मधुरि
मा ॥११॥ श्रीधनदेवस्य गगनां सरस्वती नीचकर्णाटी विजयांकाजयत्यसौ। या वैदर्भगिरां वासः कालिदासादनंतरं। १२॥ नमु

CC-0 Dharmartha Trust J&K. An eGangotri-Vaidika Bharata Initiative

शा-च

१३ 13/2

ग्धदयिताधरेन विषभाजि रत्नाकरेन राहुमखकोटरेन किलता स्यैय क्षांतरेसुदर्शन कविश्वरेर सिकवक्रहूडामशौक स्मि
धांवुधास्य जनसांद्रचांदेवतानो भवभूतिमनाहत्य निर्विस्मम तिनाम या सुरसैः यदृचिंता या मिदमा धीयते मनः ।७।। क
स्यापि। नीलोत्पलदलश्यामां विज्जकां मजानता। हथैव दंडिना प्रोक्तं सर्वशुक्ला सरस्वती ।।८।। विज्जकायाः इंदुप्रभा
रस मिदं विहंगं विहाय कीरानन्यस्फुरतिका रतिस्ते ।। आघ्येय विश्वम्भरि जल्पतु कौमुदीनां गोविंदराजवचसांच
विशेषमेष ।। १०।। देवेश्वरस्य यदयं रयं वा गेदवी मुकरस्मितवासा व्यसानितो कुहूकेटविलसति तथा वेदरेवना
वधि ।। तराभूमीभागेनिरुपमतमः क्रिविदिवसा समाधते साम्यं धनदम णितीनां मधुरिमा ।। ११।। श्री धनदस्देवानां । सरस्वतीनीचकाणि
टीविजयांकाजयत्यसौ। या वेदर्भगिरा वासः कालिदासनंतरं ।।१२।। अमृग्ध दयिताधरेन विषभाजि रत्नाकरेन राहुमख
कोटरेन किलता र्प्यय क्षांतरे सुदर्शनकवीश्वरेर सिकव क्रहूडामशौ कस्मि सुधांवुधास्य जतसांद्रचांद्रम्मं ।।१३।। श्रीहरि राम
हरदेवानां मासेन विघ्नितो त्साहा नोत्सहं तेय दक्रम ।। स्मरंतो मारवरैवक वयः कययोयथा ।। १४ ।। धनयालस्यातं वल्क विविहंगा १३

CC-0 Dharmartha Trust J&K. An eGangotri-Vaidika Bharata Initiative

नोच्चनिर्लोके षुश्रूयते ॥ यावन्तो विशति श्रोत्रे मयूरमधुरध्वनिः १५॥ द्विलग्नेन बाणेन यन्नंदे येयियदक्रमः ॥ भवेल्ल विकुरं
गानां चापलं तत्र कारणं ॥ १६ ॥ त्रिलोचनस्यैतौ ॥ भासो नाभिरसौ मिलो वरुरुचिः श्रीसाहसांकः कविर्मेघो भारविकालिदासतर
लाः स्कंधः सुबंधुश्च यः ॥ दंडी बाण दिवाणदिवाकरौ गणपतिः कान्तश्च रत्नाकरः सिद्धा यस्य सरस्वती भगवती के तस्य सर्वे पि ते ॥ १७ ॥ अहो प्रभा
वो वाग्देव्या यन्मातंगदिवाकरः ॥ श्रीहर्षस्याभवत्सभ्यः समो बाणमयूरयोः १८ ॥ सरस्वतीपवित्राणां जातिस्तत्र न देहिनां व्यासस्पर्द्धी
कुलालो भूद्यद्द्रोणो भारते कविः १९ ॥ राजशेखरस्यैतौ ॥ इति श्रीशार्ङ्गधरविरचितायां पद्धतौ विशिष्टकविप्रशंसा परिच्छेदः ॥ अथ
कुकविनिंदा ॥ अप्रागल्भ्याः पदन्यासे जननीरागहेतवः संत्येके बहुलालापाः कवयो बालका इव ॥ १ ॥ त्रिविक्रमभट्टस्य गणा
यति न यशं छंदं न वृत्तं लं गं क्षयं न चार्थसारं सिकले ना कुलिता वश्यापतयः कुकवयश्च ॥ २ ॥ कस्यापि द्राघीयसा बाधे गुणेन
तनप्रकारैः कैरपूर्वैः परकाव्यखंडैः आडंबरं ये वचसां वहंति ते पिकंथाकवयो जयंति ॥ ३ ॥ विल्हणस्य धिक्तां रेकलिकालया
हि विलये केयं वियत्स्तना हा कुं ष्कृतिशालिनां यद्वहति म्लेच्छचित्ता दृश्यतो ४ ॥ एके वीप्रयदेवत्ता भगवतो विक्रेतु मानीयं विय

१४ यस्तनाहतकर्कशातिशालिनां च वहति म्लेछो चिन्ताहृश्यतो ॥४॥ एकैको भयदेवता भगवती विक्रेतुमानीयते निःशोकैरपरैः परीक्ष
15 णाविधौ सर्वैरंगमध्याहृते ॥ ४॥ विल्हणस्य ॥४॥ विल्हणस्य कुविभिन्दैयसेवासु चिन्तालंकारहारिणी वाणीवेश्येव लोभेन युरोपकरिणी
कृता ॥५॥ क्षेमेन्द्रस्य अभवर्णापरागृह्यतावंधविग्न्हनगृहैनैः अनात्मात्मतः सतां मध्येक विश्चौरो विभाव्यते ॥ ६॥ इति श्रीशार्ङ्गध
रविरचितायां पद्धत्यां कुकविनिंदापरिच्छेदः अथ पंडितप्रशंसा ॥ अधिगतपरमार्थान्पंडितान्मावमंस्थास्तृणमिव लघुल
क्ष्मीर्नैव तान्संरुणद्धि मदमिलितमिलिंदश्यामगंडस्थलानां नभवति बिसतंतुर्वारणं वारणानां ॥ १॥ इह तुरगशतैः प्रयांतु मू
र्खा धनरहितास्तु बुधाः प्रयान्तु पद्भ्यां गिरिशिखरगतापि काकपंक्तिः पुलिनगतैर्न समत्वमेति हंसैः ॥२॥ अंजलिस्थानि पुष्पा
णि वासयंति करद्वयं ॥ अहो सुमनसां प्रीतिर्वामदक्षिणयोः समाः ॥३॥ कस्यापि उदीरितोर्थः पशुनापि गृह्यते हयाश्च नागाश्च
वहति नोदिताः अनुक्तमप्यूहति पंडितो जनः परेंगितज्ञानफला हि बुद्धयः ॥ ४॥ कस्यापि पंडितेहि गुणाः सर्वे मूर्खे हि दोषा राम
श्च केवलाः तस्मान्मूर्खसहस्रेण प्राज्ञ एको न लभ्यते ॥ ५॥ गीतशास्त्राविनोदेन कालो गच्छति धीमतां । व्यसनेन हि मूर्खाणां निद्र १४

CC-0 Dharmartha Trust J&K. An eGangotri-Vaidika Bharata Initiative

याकल्पदेहेन वा ॥६॥ कपोरण्येऽपि तौ हरेयोऽतिनगोचरे किमपि शेषस्मात्तिसर्वात्मना अर्थिभ्यः प्रतिपाद्यमानमनिशं प्राप्नोति वृद्धिं
परां कल्पांतेष्वपि न प्रयाति नगोचरे किमपि शेषस्मात्तिसर्वात्मनार्थिभ्यः प्रतिपाद्यमानमनिशं प्राप्नोति वृद्धिं परां कल्पां
तेष्वपि न प्रयाति निधनं विद्याख्यमंतर्द्धनं येषां चेत्तान् सित वर्तते न प्रतिदिनं कस्तैः सह स्पर्द्धते ॥७॥ लंएजा बपमप्युपासितगु
रुप्रज्ञाभिमानोन्नताः ख्यातस्त्वं विभवैर्यशांसि कवयो दिक्षु प्रतन्वंति नः इत्थं मानदनातिदूरमुभयोरप्यावयोरं
तरं यद्यस्मासु पराङ्मुखोसि वयमप्येकांततो निस्पृहाः ७ एतेो भर्तृहरेः इति शार्ङ्गधरविरचितायां पद्धतौ पंडितप्रशंसा
परिच्छेदः अथ कुपंडितनिंदा व्यासादीन्कविपुंगवाननुचिंतैवीक्षैः सत्तोत्लहसेत्युद्वैजल्पनिमीत्सलोचनयुगं श्लो
कान्सगर्वे पटकाव्यं धिक्तु उपस्थेरे द्विरचितं स्पर्द्ध सत्सांदेवु धैर्ये यं घभ्मुघे घम्य पर्ये पसेक्षतेन रहितः मांडिल्समासंवला
त् १ कस्युपिथ्येसंसत्सु विवादिनः परयशः शल्येन भूलाकुलाः कुंर्वतिस्खेवनगुपिनां यत्नात्तुराा छां दासंतेषां रोष
कषायिनोदरहृ शंकोयोस्मनिश्वासिनां दिसारत्न पिरेवक्रूक्षफणिनां विद्याजनोद्वेगिनी २ यीवांसंभ्भ्रतः परोल्

CC-0 Dharmartha Trust J&K. An eGangotri-Vaidika Bharata Initiative

२५
15

तिकथामात्रे शिरःशूलिनः सोद्वेगभ्रमणप्रलापविपुलक्षोभाभिभूतस्थितेः अंतर्दैर्घविषप्रवेशविषमक्रोधोष्मनिः श्वासि
नः कष्टान्नूनमपंडितस्य विकृतिर्भीमज्वरारंभभूः ३ क्षेमेंद्रस्यैतौ अज्ञः सुखमाराध्यः सुखतरमाराध्यते विशेषज्ञः ज्ञानल
वदुर्विदग्धं ब्रह्मापि नरं न रंजयति ४ भर्तृहरेः इति शार्ङ्गधरविरचितायां पद्धतौ कुपंडितनिंदापरिच्छेदः अथ महतां
प्रशंसा विपदि धैर्यमथाभ्युदये क्षमा सदसि वाक्पटुता युधि विक्रमः यशसि वाभिरुचिर्व्यसनं श्रुतौ प्रकृति
सिद्धमिदं हि महात्मनां १ भर्तृहरेः इदमुन्नतसत्वशालिनां महतां कापि कठोरचित्तता उपकृत्य भवंति दूरतः
प्रत्युपकारशंकया २ नाल्पीयस्यपि निबध्नंति पदमुन्नतचेतसः येषां भुवनलाभेपि निःसीमानो मनोरथाः ३ अ
हो किमपि चित्राणि चरित्राणि महात्मनां लक्ष्मीं तृणाय मन्यंते तद्भरेण नमंत्यपि ४ देवेश्वरस्य ॥ किं वा परेण
बहुना परिजल्पितेन संसर्ग एव महतां महते फलाय अंभोनिधेः स्फुटरुहास्तनवोपि येन वेलाजलोच्छलितरत्नकणा लवा॥
५ आयत्तैव हि महतां शक्तिरभिव्यज्यते न संपत्सु अगुरोः ख्यापनगंधाधारोनयपपात्रियुग्धाग्नियतिनस्य ६ कयोरप्येतौ २५

CC-0 Dharmartha Trust J&K. An eGangotri-Vaidika Bharata Initiative

वज्रादपि कठोराणि मृदूनि कुसुमादपि लोकोत्तराणां चेतांसि को हि विज्ञातुमर्हति ॥७॥ भवभूतेः जितरोषरया महाधियः सपदि
क्रोधजितो लघुर्जनः विजितेन जितस्य दुर्मतेर्मतिमस्ति सह का विरोधिनो ॥८॥ माघकवेः गवाशीनां पयोन्येद्युः सद्यो वाजा
यते दधिः क्षीरोदधेस्तु नाद्यापि महतां विकृतिः कुतः ॥९॥ देवेश्वरस्य संपदो महतामेव महतामेव चापदा वर्द्धते
क्षीयते चन्द्रो न तु तारागणः क्वचित् १० अथ कुर्वन्नपि व्यापायः प्राप्नोति महतः फलं श्रोर्वं दहनमेवाग्निः संनयति साग
रः ११ महतां प्रार्थनेनैव विपत्तिरपि शोभते दन्तभंगो हि नागानां श्लाघ्यो गिरिविदारणे १२ ननु मूलादिषु भिहितं
जलमाविर्भवति यज्ञ्वाग्रेष्यु निम्नतं यदुपक्रियते भरपि महान्तो वहन्त्युच्चैः १३ अचिंत्याः पंथानः किमपि महतामं
धकारी येयर्पदस्सरोभूते जस्तदहृत कथामप्यमदनेनानुनेन्द्रैत्रादेत्रैसेदृजनियन्ज्योति रहह प्रतेनैतेनेदं मदनमयमेवत्रि
भुवनं १४ केषामप्येते महीन्मानो नुगृहूंति भजमानात्रिपुनयि सपत्नीः प्रायपत्यद्भिर्सिंधवो नगतिम्नगानिम्नगाः
१५ माघकवेः ॥ इति शार्ङ्गधरविरचितायां प्रशंसापरिच्छेदः अथ धीरप्रशंसा सहपरिजनेन विलसति धीरो एहनातितरांतिष

CC-0 Dharmartha Trust J&K. An eGangotri-Vaidika Bharata Initiative

१६ नरेकः विषमेकेननियीत त्रिपुरजिता सहस्रैरेरम्दतं १ कस्यापि निंदंतुनीतिनिपुणाय दिवास्तवंतु लक्ष्मीः समाविशतु गच्छतु वा
16 यथेष्टं अद्यैववा मरणमस्तु युगांतरे वान्यायाप्पास्पथः प्रविचलंतिपदं न धीराः २ भर्तृहरेः श्लाघ्यमाहतामुन्नतिरम्बुजमध्य
वसितं च धीराणां कनकगिरिरनभिलंघ्योरविरनिशमनुभ्रिक्रतोरभः ३ कस्यापि कदर्थितस्यापि हि धैर्यवृत्ते र्नशक्य
ते धैर्यगुणः प्रमार्ष्टुं अधोमुखस्यापि कृतस्य वन्हेर्नाधः शिखा याति कदाचिदेव ४ कस्यापि येदीनेषदयालवः स्यु
रुगतियानल्पोपिन श्रीमदव्याधयोपेचयपरोपकारकरेणोहृष्यंति येया वित्तः स्वस्याः संतिवपौवनोन्मदमहाव्याधिप्र
कोपापिये जैनेस्तंभैरिवसुस्थिनैः कल्पिमण्डनोनाधराधार्यंते ५ कस्यापि अर्थे ४ सुस्थिरत्वं कीर्तिरपीह माभूद्वन
र्थएवास्तु तथापि धीराः निजप्रतिज्ञामनुरुध्यमाना महोद्यमाम्कर्मसमारभंते ६ कस्यापि अंगणावेदी वसुधा कुल्या एम
जलधिस्थलीचपातालं वल्मीकश्च सुमेरुः कृतप्रतिज्ञस्य धीरस्य ७ वाणभट्टस्य इति श्रीशार्ङ्गधरविरचितायां धीरप्रशंसा
परिच्छेदः अथ सज्जनप्रशंसा उपकर्तुं प्रियं वक्तुं कर्तुं स्नेहमकृत्रिमं सज्जनानां स्वभावोयं केनेन्दुः शिशिरीकृतः १ इस्योप्य १६

क्रमशः पर्वणि पर्वणि यथा रसविशेषः तद्वत्सज्जनमैत्री विपरीतानां च विपरीता २ निर्गुणेष्वपि सत्वेषु दयां कुर्वंति साधवः
नहि संहरते ज्योत्स्नां चंद्रः चांडालवेश्मनि ३ उपकारिषु यः साधुः साधुत्वे तस्य को गुणाः अपकारिषु यः साधुः स ~~साधुर्~~ हि संह
स साधुः सद्भिरुच्यते ४ हृदयानि सतामेव कठिनानीति मे मतिः खलवाग्विशिखैस्तीक्ष्णैर्भिद्यंते न मनाग्यतः ५ अपे
संते न च स्नेहं न पात्रं न दशांतरं सदा परोपकाराय रत्नदीपा इवोत्तमा ६ केषामप्येते उपचरंति ता
संते न च स्नेहं न यात्रं न दशांतरं सदा परोपकाराय रत्नदीपा इवोत्तमाः ६ केषामप्येते उपचरंति ताः संतो यद्यपि कथयंति
नैकमुपदेशं यास्त्वेषां स्वैरकथास्ता एव भवंति शास्त्राणि ७ अन्तर्हितैः सुजनो न याति वैरं परहितनिरतो विनाशकाले
पि छेदेपि चंदनतरुः सुरभयति मुखं कुठारस्य ८ रविश्मतस्य अतिकुपितानामपि सुजनानां योगेन मृदुभवंति न तु नीचाः हे
म्नः कठिनस्यापि द्रवणोपायोस्ति न तृणानां ९ कस्यापि। अन्तकुजनः खलसुजनावत्रावयोः समयाश्वास भागयोः सयाः
विदधाति रंध्रमेको मुद्रणमन्यः परो विदधाति १० गोपभहस्य संतो यि संतः कर्किरंतु तेजः कनुज्वलंतु हन न न प्रपंतां

CC-0 Dharmartha Trust J&K. An eGangotri-Vaidika Bharata Initiative

१० 17 विभामवुधाननुवेधसैवब्रसां उक्काशेषटदीपकस्मा: १० गोत्रस्थितिन मुंचे त्निस्रासंततत्रिमाधिता: उरन्वंतस्तुसंन स्वमहासत्नतया
नया ११ बूतेन्मसासनोप्यार्यीग रागान्स्येषांस्तकदुर्जनः वुल्येयस त्वेकिंलेकोगच्छस्मूख्वेमधोऽपते १२ आसामम त्स्तुज
नाःपरोपकारैककरणदुर्ललितास्संतापितापिमनेभस्वगुणोघ यिहंतरवियंते १३ यद्मीदशंतिदवानारसानात त्वा
मनुभवत्ति प्रकृतिरियं विमनांस्कि श्यंति यदन्मका ध्येषु १४ देवेश्वरस्य शरदिनव र्षेतिगर्ज्जेत्निवर्षेत्तिवर्षास्तनिः
स्वनोमेघःनीवावदतिनकुरुतेन वदत्तिसुजनःकरोत्येव १५ अव्यापिनो ज्ञातिहरः किलकालकूटंकूर्मो विभर्ति धरा
रंणीरलेषयभागे अंभोनिधिर्वृहतिदुःसहवाडवाग्निमगीकृतसुकृतिनःपरिपालयंति १६ आदिमध्यनिध
नेषुसौहृदंसज्जनेभवतिनेतरेजने छेदतापनविघर्षताडनैनोन्यभावमुपयातिकांचनं १७ येज्ञातेव्यसनेनिराकु
लधियःसंपत्सुनाभ्युन्नताप्राप्तेनैवपराङ्मुखाःप्रणयिनिप्राणोपयोगेरपि ह्रीमंतःस्वगुणप्रकाशनविधावन्यस्तकैः
यैर्ज्जितास्तैर्भूमंडलमंडनैकतिलकाःसंतःकियंतोजनाः १८ मुखं प्रियाणायिनिप्राणोपयोगैरपिह्रीमंतःस्वकाशन रामू १०

नेत्रोह्रिरामचंद्रं हृदयेन नयमनन्तरे मधुरं ह्रीविषमिवेश्वरः १९ जयत्यहो कृतं विधिना विषवृक्षसंततः स्वल्पं प्रदेशे विहिताः तु छेपयाय मिघ
नानांसी हन्मतो वजीवलोकोपमम् २० केषामप्येते न चेद्दग्धा छिमयो विमौक्षजन्म हुज्ञौनो किंलिंद्रेः सौरदः पूर्वैः का
लं कूटस्थ चोत्तरः २२ राजशेखरस्य इति शार्ङ्गधरविरचितायां पद्धतौ सज्जनप्रशंसापरिच्छेदः अथ मनस्विप्रशंसा
कामं प्रियानपि प्राणान विमुञ्चंति मनस्विनः इच्छन्ति न लघु मित्रेभ्यो महतो मपि सत्क्रियां १ अहह महत्वं भगस्य यत्कमपि धस्म
पाविते अहो वत महत्कष्टं च स्वमानपियाचते २ कस्यापि मैत्रैयस्यामे वा महातिक्षितपटछत्रयालीकपालीमादाया
मापगर्भे ह्रिजबरहुतभुक धूमधूम्नोपकंठे द्वारं प्रहतो वरमुदरदरीयूरणायमनुधावैर्मानो प्राणान स्वरे शेनचु
चरनदिनं तु ल्पकुत्सेषु दीनः ३ वरमाहिमगरवन्केधाध्यानेकरोविनिघोषितोद्विषमपि वरं पीलास्त्रसं कृतांत निवेशने
गिरिवरतटी मक्कस्यात्मा चरं शतधा हतो न तु खलजनावाप्तैरर्थैः कृतोहितमात्मनः एतौ भर्तृहरेः उद्योगेकियदस्त्रनत्रव
सुधापिंडं किमावक्षाहेनत्रायेकनरंखुरवरममितास्तस्मिन्न्दमाः केवलात्मा दैन्यप्रशान्तोयन्नोन विभवाद्दृष्यानु कांपक्ततेत्रै

CC-0 Dharmartha Trust J&K. An eGangotri-Vaidika Bharata Initiative

१८ स्तेताधिष्ठ्य यः स्पृहयं निर्हेन किमपि स्वार्थेन नत्वेभ्योऽपि ये ॥५॥ श्रीदेवगणदेवानां यातालाभ्न विमोचितो वलिञ्चैतोतानम
18 सः स्वयं नोन्नतः शाश्वतो छन्नेसमलिनानोन्मूलिताव्याधयः शेषस्याधिभरे विधत्सन कृतोभारावतारः स्वर्णे चेतः समस्त
षामिमानमनिशं मिथ्यावहनिवद्धमे ६ एकस्स एवजीवति हृदयविहीनः सहृदयोऽह्नः यः सकलखिमभाजनमु
द्धरं न विभर्त्ति दुःषुरं ७ वरे हलाहलं पीतं सद्यः प्राणहरं विषं न दृष्टं धनांधस्य भ्रूभंगकुटिलं मुखं ८ व्रतस्य कुर्वन्व
द्वापि न भवति पूर्वोपकारिणो जनस्य एकोऽनुकरोति कृतं निःकारणमेकापरः कुरुते ९ कामवने षट्हरिणास्तेणे
नजीवेत्सुमल्लस्समेन धनिषु न देस्मं विदधति ते किल पशवो वयं सुधियः १० कृतन्तनमकृषांड फलानां केभ
युंतमो ग्रंगुली दर्शनाद्यैन विलीयंते मनस्विनः केषामपि ब्रह्मांडमंडली मात्रे किलो भाममनुस्विनः एमः रिसु
रिजे नाव्वे कुर्वता जातु जायते १२ कुसुमस्तवकस्येव द्वे हृत्तौ च मनस्विनः मूर्ध्नि वा सर्वलोकस्य शीर्येत वनेऽथवा १३ म एमः
न्देहेरेया द्राहृतं यहु वाञ्छायमजून माधिरोहति स्वस्थादेवायमाने पि देहि नस्तद्रंगरजः १४ माजीवन्यः परावज्ञादुःख १८

CC-0 Dharmartha Trust J&K. An eGangotri-Vaidika Bharata Initiative

दृग्धोपिजीवतितस्माजननिरेवास्तुजननीक्लेशकारिणः १५ सम्यग्लेघातमसंतः पराञ्चोद्युतिमानिनः प्रध्वंसितोधनम
स्तमोहेहरशारविः १६ सप्तमानर्घवज्ञन्मायस्यनाम्निपुरःस्थिते नाम्नमंगलिमाभ्येतिमेशोयामुद्यतांशुलिः १७मा
धकवेः इति श्रीशाङ्करविदितायांमलेस्तवेनःप्रशंसापरिच्छेदः अथोदारवसंसा आकारमात्रविज्ञातसंज्ञादिनम
नोरथाःतेधन्यापेनम्रशंवन्तिदीनाःपुरापिनागिरः१ देहिदेहीतिजल्पन्तिसागिनोप्यर्थिनोपिच आलोकयन्तिरानसा
हाल्लिनास्तोतिनकश्चित २ शुद्धान्तैर्यत्तिसम्भवः पठंतिमंकसारिकाः दानंशक्नोतियोवित्तेसम्प्रःसचपञ्जिनः ३
एकेनन्तिस्वतांधन्ताहर्मेनोपरि निष्ठताहालयाचकर्यौभर्वः कराभ्यामेवसत्रिनः ४ सैवपरेनविनश्यतिनश्य
तिनश्यतिमश्यतितनरधियामीर्ल्लिवेशितामसत्त्व श्ववशिष्यतेहिमांशोःसैवकलायास्थिताशंभो ५ चयेनिजःप
रोवेत्तिगणनालघुचेतसां उदारचरितानांतुवसुधैवकुटुंबकं ६ बोधयन्तिनयाचन्तेभिक्षांद्वारेगृहेगृहेदीयतांदीयतां
नित्यमन्तःफेषामर्थेतु अर्थिनोहृदयगाहत्तिस्त्वन्मुखेप्रतिनितामहातत्रतद्वस्याप्रदैर्वनामसमक्षमीक्षते ७ द
हिनःयदृहातिविशिष्टेभ्योपचाश्नातिदिनेगतेवितमहंमन्येशोषमन्यस्यरक्षति ८ भगवतोव्यासस्यकितमाक्षिप

CC-0 Dharmartha Trust J&K. An eGangotri-Vaidika Bharata Initiative

१९
19

नेत्रस्य वधूरिव रकोवला यानवेशेषवसा ग्रान्यप्रयिकैरपि भुज्यते १० विक्रमादित्यस्य लक्ष्मीपयोधरोत्संगकुंकुमारुणितो
हरेः धमोवलिः सयेनास्य भिक्षापात्रीकृतः करः करोस्त्वं शिविमांसं जीवं जीमूतवाहनः ददौ दधीचिरस्थीनि नास्ति देयं
महात्मनां १२ द्विः शरं नाभिसंधत्ते द्विः स्थापयति नाश्रितान् द्विर्ददाति न चार्थिभ्यो रामो द्विर्नैव भाषते केषा
मप्येते १३ द्विः शरं नाहि संधत्ते हतानां नोचोषितसेव्यः स्थातं निःफलो न महानपि जलार्थिवारिधिं मुक्त्वा यस्य
कूपं निषेवते १४ इति श्रीशार्ङ्गधरविरचितायां उदारपुरुषप्रशंसा समाप्ता अथ तेजस्विप्रशंसा बालस्यापि रवेः पादा
पतंत्युपरि भूभृतां तेजसा सहजातानां वयः कुत्रोपयुज्यते १ सिंहः शिशुरपि निपतति मदमलिनकपोलभित्तिषु ग
जेषु प्रकृतिरियं सत्त्ववतां न खलु वयस्तेजसो हेतुः २ यद्यपि विधिवैगुण्यात् सिंहः पतति दुस्तरे कूपे तदपि हि सततं तेषां
छनति करिकुंभविदारणमनसा ३ तेजांसि यस्य प्रशमं प्रयाति वाराप्रवाहेण स वन्हिरग्निः अयं पुनर्वीडवनामधेयः स
मुद्रमापीय बिभर्ति तेज ४ एकः स एव तेजस्वी सैंहिकेयः सुरद्विषां शिरोमात्रावशेषेण जीयते येन शत्रवः ५ केषा एभः
मप्येते मौनी प्रदाप्रहारैरपि न क्षमी नीच एव सः आक्रम्य शोस्त्वाभिरपि न तेजस्वी सलोहितः ६ स्मैन्द्रस्य तुमेयराधे १९

स्वर्भानुर्भानुर्भानुमंतं चिरेणायत्त् हिमांशुमाशु ग्रसते तन्म्रदिम्नः स्फुटं फलं ७ माधवस्यैव तेजस्विनि क्षमासारे नातिकर्कशमार्दवे रे
न ज्वलति निर्मथनाद्वन्हिश्चंदनादपि जायते ८ तेजोहीनेन महीपालैश्च विस्फुर्यते निःशंको हि जनो धत्ते पदं भस्मनि भु
ष्मणि ९ कमोरक्ष्यते इति शार्ङ्गधरविरचितायां तेजस्विप्रशंसापरिच्छेदः अथ गुणप्रशंसा गुणाः कुर्वंति दूतत्वं दू
तत्वं दूरेपि वसतां केतकीगंधमाघ्राय स्वयं गच्छंति षट्पदाः १ गुणवज्जनसंसर्गाद्याति स्वल्पोपि गौरवं पुष्पमालानुषं
गेन सूत्रं शिरसि धार्यते २ गुणाः सर्वत्र पूज्यंते पितृवंशो निरर्थकः वसुदेवं परित्यज्य वासुदेवं नमेज्जनः ३ न हि जन्मनि ज्येष्ठत्वं
ज्येष्ठत्वं गुणा उच्यते गुणाद्गुरुत्वमायाति दधि दुग्धं घृतं यथा ४ गुणिनि गुणज्ञो रमते नागुणिशीलस्य गुणिनि परि
तोषः अलिरेति वनात्पद्मं न दर्दुरस्त्वेकवासोपि ५ नीरसान्यपि रोचंते कर्पासस्य फलानि नः येषां गुणमयं जन्म परेषां गु
ह्यगुप्तये ६ गुणा गुणज्ञेषु गुणा भवंति ते निर्गुणं प्राप्य भवंति दोषाः सुस्वादुतोयाः प्रभवंति नद्यः समुद्रमासाद्य भवंत्यपेयाः
७ गुणिनि जनने लोकानिजवंधनशंकया राजन् लक्ष्मीः कुरंगीव दूरं दूरं पलायते ८ गुणैः सर्वज्ञकल्पोपि सीदत्येको नि
राश्रयः अनर्घ्यमपि माणिक्यं हेमाश्रयमपेक्षते ९ गुणवद्भिः प्रयत्नापल्लवाटोपैः किंप्रयोजनं विक्रीयंते न घंटाभिर्गावः क्षी

CC-0 Dharmartha Trust J&K. An eGangotri-Vaidika Bharata Initiative

20 रविवर्जिताः १० गुणैर्गौरवमायाति न महत्यापि संपदा पूर्णेन्दुर्न तथा वंद्यो निःकलंको यथा कृशः ११ न सौख्यसौभाग्यकरा
गुणा न्नराणां स्वयमेगृहीताः सुहृद्यांसनाद्व परैर्गृहीनाद्धिनपवित न्वेतेनते नगरंद्वति निजंगुणं बुधाः १२ कोपेपंकृमि
जं सुवर्णमुपलान्न दूर्वा पिंगोपमतः पंकात्तामरसं धशांकउदधेरिन्दो वर्गोमयात्। काष्ठादग्निरहेः फणादपि मणिर्गोपित
नेरोचना प्राकाश्यं स्वगुणोदयेन गुणिनो गच्छन्ति किं जन्मना १३ केषामप्येतो एकमेव गुणाप्रप्पनत्वान्नामगमद्दनुःनवा
शेषगुणाराजन्तस्ववेतेतिमविस्मयः १४ स्वयंगुणपरिरसागाहृणाकामः पतनसधः तमेव संहरन्नभूयुः पदमुच्चैर्विगाह
ते १५ गुणैरुत्तुंगतां याति नोच्चैरासनसंस्थितः प्रासादशिखरस्थोपि काकः किं गरुडायते १६ भद्रे हरेः गुणतां याति दूष
एगुणतां श्रीजिनो न्वैरासनसंस्थितः प्रासादशिखरस्थोपि काकः किं गरुडायते १७ भन्नवित यथाहि नम्रता दोषः स्त
नपोस्तब्धतागुणः १८ अहो वैचित्र्यमेतस्य संसारस्य किमुच्यते गुणोपि क्लेशहेतुः स्याद्धि श्रांतःकेटकेदल १९ अनवसरेगु
णवान पिहस्याद्दवतार्य तेहारः पवपशालाकावसरेत्सोपि भूषैः प्रसार्यते स्वकः २० केषामप्येचेदृति शार्ङ्गधराविर रम
चितायां गणायप्रशंसायरिच्छेदः अथ पत्तोबप्रशंसा अहकलापासंतापमकलाराबलललनमन्ततो अनस्तमस्तावत्त्र्म २०

CC-0 Dharmartha Trust J&K. An eGangotri-Vaidika Bharata Initiative

पत्त्वत्त्यमपिजहद्दुः १ यासःस्मवपमिहृपनिनुष्प्रावलकलेस्त्वेचलस्मासमरुरूपरिणोयोनिर्विशेषोविशेषः सहिभवतिरगिहोपस
न्त्स्माविशालामनसिचयनिनिहेकोयेवानकोदरिद्र २ मत्देहरेःदगिदुस्सपपम्नृनिस्त्स्मानदविणालता जरद्धवधनःश्चेभुः
त्पयापिपरमेश्वरः ३ विश्मरुपर्म्मणाःसंतोषाम्न्तत्स्मातोयस्सुखंशांतेचतषाममत्तोगतिः ४ योमेगर्भगतस्यापिरजिक
ल्पितवान्पयः शोषहृतिविधानेनसकिंसुतोपवाम्नतः ५ अप्राप्पिताभिन्दुःखनिमयेवायांच्छिदेहिंना सुखान्यपित
पापांछिदैन्यमत्राप्तिरिष्यते ७ पंचमेहनिसप्ते वाशाकंपचतिस्वेगृहे अनृणीचाप्रवासीचसवारिचरमोदते ८ आत्मा
धीनशरीराणांस्वपतांनिद्रयालया कृतंनमयिमंस्तौनप्रमत्तलापकल्पते ९ सर्वंवसंपदस्तस्यसंतुष्टंयस्यमानसं उपान
त्पदस्यननुचर्माछन्नेवभूः १० यासस्पआरोगंपविद्वतासज्जनमैत्रीमहाकुलेजन्मस्वाधीनतावपुंसांमहदैश्वर्यंविनाप्य राम
थैः ११ सर्पाःपिवंतिपवनंनचदुर्बलास्तेशुष्कैस्तृणैर्वनगजाबलिनोभवंति कंदैःफलैर्मुनिवराःक्षपयंतिकालं सं
तोषएवपुरुषस्यपरंनिधानं १२ अधीकरोतिदैन्यंलब्धाथोगवापरितोषंच नष्टधनश्चसशोकःसुखमास्तेनिस्पृहःपुरुषः

CC-0 Dharmartha Trust J&K. An eGangotri-Vaidika Bharata Initiative

२१ १३ नन्वखलेगुरुत्नाम्बुलस्तेशोरवंतवशस्तवैरेनिमं नतस्मैगवायपरिनोषंव नष्टधनश्रुसशेणकःसातमास्ति निस्पृहःपुरत्वभागंपुत्रामदेहे
रुग्णायेनेनाम १४ केषामयेते॥ इति श्रीशार्ङ्गधरविरचितायांनोषप्रशंसापरिच्छेदः अथ संसर्गप्रशंसा महानुभावसंसर्गः कुसमनोन्नोति
कारकारगुण्यांबुजान्हवीसंगात्त्रिदशैरपिवंद्यते १ एकेकेचिद्यांतिकागतासःपात्रसंबोलभंतेगायंतंमेसरसमधुरंवीणयासं
प्रसक्ता एकेतेषांसहगतिवशाद्दुस्तरंतारयंति केचिनेषांन्वलितहृदया एकमेवपिबंति २ एनौविलस्य शाकिणः शुम
स्वेठदैत्यंदनसंगतोपिवक्रोजपेतःकोतिसमापतासपाःपयोपिमवं श्रुपचेहिमसमतेसंसर्गजादोषगुणाभवंति ३ उह
कोत्मसोमावजस्य इघत्वात्सर्वेलोहानामसत्वान्मगव क्षिरणाभ्यपाहेन्नानाग्राम रत्नीगांदर्शनात्संमतं सतांस
नां ४ विकृतिंनैवगच्छंतिसंगदोषेणसाधवः आवेष्टितंमहासर्पैश्चंदनंनविषायते ५ नस्यानवंतनगंतवंस्पणमप्पधमैः
सह यथोपिशोभिनीदृस्वमदिरांमन्यतेजनः ६ वीरागावंशापयातंवीचुवस्तुचेकुवोस्विपःपिबसनाप्येसंयोगाद्दल्केनल्कं राम
चतोपयाः ७ किंचिदाश्रयसंयोगाद्धत्तेशोभामसाध्वपि कांतोविलोचनेसक्तंमसमपिबांजनं ८ आश्रयवशेनसततंगुरू २१

CC-0 Dharmartha Trust J&K. An eGangotri-Vaidika Bharata Initiative

नालघुनाचजायतेजंतोःस्थिंधेविधसमानात्करिणोवनदर्पणोलघवः ९ संसर्गोभवतिहिसाधुनाखलानांसाधूनांनचखलसंगमा
न्खलेत्वेच्यामेदंकुसमभवेम्देवधत्तेम्रहं धंनचकुसुमाविधारयंति १० नसाधुःकुत्रापिव्रजतिखलदोषंनगुणान्नाखलोरक्तो
संसर्गैरपिकृतनिश्चराःपयापक्षिप्यालैरपिहितनतनुश्चेदनतरुर्न्नवैकसंयातिस्वपयपतिचन्यापंसमनसं ११ असाधुःसा
धुर्भवतितलज्जातेषपुरुरुषोनसंगाद्दोर्जेम्येनहिसज्जनताकस्यचिदपिसमानेसंसर्गेमपिभजगमोज्झेन्मजनितेम।
णिन्मोहेहेषानस्यशांतिननुसर्पोमणिगुणान् १२ केषामण्येतेसंनहापमिसंस्थितस्यपयसोनामापिनज्ञायतेमुक्ताका
रतयातदेवनलिनीपत्रस्थितंराजते स्वात्यांसागरशुक्तिसंपुटगतंतज्जायतेमौक्तिकंप्रायेणाधममध्यमोत्तमगुणाःसंस
र्गतोजायते १३ अश्वःशस्त्रंशास्त्रंचवीणावाणीनरश्चनारीचपुरुषविशेषंप्राप्यभवंतियोग्याअयोग्याश्च १४ आसीत्त
द्वैविमलजलधेर्मज्जनंभयतोनांनारीणांचप्रबलमुकुटेकांचनेनप्रसंगंतत्त्रीवहद्वाकथमिहमहोकाचखंडेनसार्द्धमिलितो
कंठेमरकतमणेःकामवृस्यागतोऽस्मि १५ एतेविष्णुशर्म्मणः इतिशार्ङ्गधरविरचितायांसंसर्गप्रशंसापरिच्छेदः अथपुनः

CC-0 Dharmartha Trust J&K. An eGangotri-Vaidika Bharata Initiative

२२ यशोस्ता जातिर्यातु रसातलं गुणगणस्तस्याप्यधो गच्छतां शीलं शैलतटात्पतत्वभिजनः संदह्यतां वह्निना शौर्ये वैरिणि वज्रमाशु
२२ निपतत्वर्थोस्तु नः केवलं येनैकेन विना गुणास्तृणलवप्रायाः समस्ता इमे १ यस्यास्ति वित्तं स नरः कुलीनः स पंडितः स श्रुतवा
न्गुणज्ञः स एव वक्ता स च दर्शनीयः सर्वे गुणाः कांचनमाश्रयंति २ एतौ भर्तृहरेः वयोवृद्धास्तपोवृद्धा ये च वृद्धा बहुश्रु
ताः सर्वे ते धनवृद्धानां द्वारे तिष्ठंति किंकराः ३ वाणास्त्रः हेतु भ्रमणाय पुन्के वाक्यं न भवपते रीहस्य आपत्ति परुषमसं
संभ्रमं वा कं सम्मृहस्य ४ स्पृशेद्य पार्थीजीव लोको यं भ्रमण्यानमपि सेवते अनेतारमपि स्तं जानिःस्वं गच्छति दू
रतः ५ न सा विद्या न तल्लक्ष्मी लेन नन्हानं न सा कला अर्थार्थिभिर्न चेन कार्यं धनिना यन्न कीर्त्यते ६ यथामिषं ज
ले मत्स्यैर्भक्ष्यते श्वापदैर्भुवि आकाशे पक्षिभिश्चैव तथा सर्वत्र वित्तवान् ७ न वित्तं दर्शयेत्प्राज्ञः कस्यापि वित्तस्वल्पमण
हो मुनेरपि यत स्तस्य दर्शनाच्चलते मनः ८ एते वित्तक शर्मणाः लक्ष्मा परिपूर्णे हं न भयं मे स्तीति मोहनिद्रेषा राम
वापूर्णा समये दंभं भवति भयं सिद्धिकासमोः ९ भक्ते द्वेषो जडे प्रीतिः सुरुचिर्गुरुलंघने मुखे कटुकता नित्यं धनिनां ज्व २२

CC-0 Dharmartha Trust J&K. An eGangotri-Vaidika Bharata Initiative

रिणमिव: १० आलिंगिताः पैरेर्यांति प्रस्खलंतिसमेमयधि अयकानिचभावंते धे[illegible]निनोमघयाइव ११ पतंतिखड्गधारासु विशं
तिमकरालयं किंचकुर्वंतिसभगेकुष्ठमयोघिनोनराः १२ गुणक्षोभ्योपातिरिक्तः कूपेषु ठेमया निर्गतोपिभूत्वः पस्य
जनैः शिरसिधार्यते १३ केसामप्येते इतिशाखुति ३ सहजांधदृशः स्वदुर्नयेपरदोषेक्षणदिव्यचक्षुषः स्वगुणोच्चगिरोमु
नताः परवर्णग्रहणेष्वसाधवः ४ एतौमाघकवेः विषधरजोप्यतिविषमः खलइतिनमृषावदंति विद्वांसः यदहिर्नकुलद्वे
षीस्वकुलद्वेषीपुनःपिशुनः ५ अतिमलिनेकर्तव्येभवतिखलानामतीवनिपुणाधीः तिमिरेहिकौशिकानांरूपंप्रतिपद्य
तेदृष्टिः ६ एतौसर्वधीः लक्षोञ्ज्ञायोनो वः प्रथममेदस्वामिनंपरामवति भूमिरजोरघ्यादाद्दुच्छायकमेवसंहणुते ७ रविशुमस
उपलक्ष्मनेनसज्जनाभिन्नसतामस्तिनकश्चिदयेस्माहेतुः स्वहकमाम्निनमनुहृतोग्निर्दहत्यवः ८ विषमामलिनात्मानाद्विजिह्वा
जिह्मगाइव जगत्प्राणहरानित्यं कस्यनोद्वेजकाः खलाः ९ हरिगणोस्य दुर्जनः परिहर्तव्योविद्ययालंकृतोपदि मणिनाभूषितः
सर्पः किमसौनभयंकरः १० चाणाक्यसपरिमुद्रामपिवतिसमाश्रितोदुर्जनः पगान्वयश्चतेपवनाशिनोपिभुजगाः परोपतापेनमु

CC-0 Dharmartha Trust J&K. An eGangotri-Vaidika Bharata Initiative

२३ ध्यंति ११ नीचः समाश्रितोवशमनवाप्यपराश्रये छिद्रमन्वपिमाप्नोति हष्टांतोत्रटीभवः १२ खलानां कंटकानां चद्दिविधैवप्रतिक्रिया उपान
23 त्मुखभंगोवा दूरतोवापिवर्जनं १३ समुखोपिसदहनोपिसन्मार्गेयतितोपि सन समतोवै पादलग्नोपिव्यथयत्येवकंटकः १४ अ
भवः कोपिकोपाग्निः सज्जनस्यखलस्यचा एकस्मशाम्यति स्नेहाद्दुद्धेनेमस्सुवारिजः १५ निमित्तमुद्दिश्यहि यः प्रकुप्यति ध्रुवंस
तस्यापगमेप्रसीदति अकारणाद्द्वेषिमनोऽस्ति यस्य कथं जनास्तंयति १६ पादाहतोपियदृढदंडसमाहतोपि यंदंष्ट्रयाग्रस्पृशति
तंकिलहंतिसर्पः हर्षादिवैषपिशुनोत्रमनुष्यधर्मा कर्णेपरेस्पृशतिहंत्यपरसमूलं १७ नोभ्रदुर्जनजिह्वाच प्रतिकूलवि
सर्पिणी परप्रतारणायैवदारुणाकेननिर्मिता १८ यस्मिन्वंशेसमुत्पन्नस्तमेवनिजचेष्टितैः दूषयत्यचिरेणैवघुणकीटइवाधमः
१९ प्रेरयति परामनार्यः शक्तिविहीनोपिजगद्भिद्रोहे तेजयतिशस्त्रधारांस्वयमसमर्थः शिलाः छेत्तुं २० स्वभावकठिन
स्यास्यकश्चिन्नांविश्वस्तोनतिं गुणोपियपराहिंसायैचापसंवखलस्यच २१ अयः पिंडइवोत्तप्ते खलानां हृदये क्षणात् पतिता राम
एवनेष्यतेगुणास्तोयकणाइव २२ वर्जनीयोमतिमताद्दुर्जनःसख्यवैरयोः श्वाभवत्यपकारायलिहन्नपिदशन्नपि २३ वक्रतां २३

CC-0 Dharmartha Trust J&K. An eGangotri-Vaidika Bharata Initiative

विभ्रतोपसगुत्थमेवप्रकाशते कथंनवसमानः स्यात्तपुच्छेनपिशुनः शुनः २४ शिरसिनिहितोपि नित्यंयत्नादपिसेवितोवहु
स्नेहैः नरुणीकचइवनीचः कौटिल्यं नैवविजहाति २५ पात्रमपात्रीकुरुते दहति गुणांस्नेहमाशुनाशयति अमलेमलंनियच्छ
तिदीपज्वालेवखलमैत्री २६ स्नेहेनभूतिदानेनकृतः स्वस्योपिदुर्जनः द्व्येशाक्षान्तिकेनिष्टन्करोत्येकमपिहिधा २७
यथायथैवस्नेहेनभूयिष्टस्सुपवर्ध्यते धत्तेतथातथातापमहावैश्वानरः खलः २८ स्तोकेनोन्नतिमायातिस्तोकेनायात्यधोगतिं अहो न
सदृशीवृत्तिस्तुलाकोटेः खलस्यच २९ नैवात्मनोविनाशंगणयतिपिशुनः परव्यसनसंसक्तः प्राप्यसहस्रविनाशंसमरेनृत्यति
कवंधइव ३० दह्यमानाः सुतीक्ष्णेननीचाः परयशोग्निना अशक्तास्तत्पदंगन्तुं ततोनिंदांप्रकुर्वते ३१ खलः सत्क्रियमाणो
पिनयतिकलहंसतां दुग्धधौतोपिकिंयातिवायसः कलहंसतां ३२ कैर्वाममप्येतेनविषममृतं कर्तुं शक्यंप्रयत्नशतैरपिमजतिक
दुर्जनंस्वानिवृत्तःस्थितोपिपयोहृदे गुरुणपरिचितामार्गीवाणीनजल्पतिदुर्जनः स्थिरमपिवलाध्मातेलोहेकृतः कनका
कृतिः ३३ भर्तृहरेः इतिशार्ङ्गधरादिरचितामार्गीवाणीनजल्पतिदुर्जनः स्थिरमपिवलाध्मातेलोहेकृतः कनकाकृतिः ३३

CC-0 Dharmartha Trust J&K. An eGangotri-Vaidika Bharata Initiative

रा० व्रा०

